**अचिरप्रभा** स्त्री अचिरा अचिरस्थायिनी प्रभा यस्याः । विद्युति । "च्युता दिवः स्यादनु दिवाचिरप्रभेति" भट्टिः । अल्पकालस्थायिप्रभावति त्रि० । कर्म्म० । अचिरायां दीप्तौ स्त्री ।

**अचिरभास्** स्त्री अचिरा अल्पकालस्थायिनी भाः यस्याः । विद्युति । अल्पकालस्थायिदीप्तिमति त्रि० ।

**अचिररोचिस्** स्त्री अचिरं रोचिर्यस्याः । विद्युति । अचिरकान्तिमति त्रि० । कर्म्म० । अचिरकान्तौ न० ।

**अचिरस्य** अव्य० चिरस्येत्यव्ययेन न० त० । स्वल्पकाले ।

**अचिरांशु** स्त्री अचिरा अंशवोऽस्याः । विद्युति । "अचिरांशुसमप्रभेति" पुरा० । अल्पकालस्थायिकिरणवति त्रि० । कर्म्म० । अचिरकिरणे पु० । [लब्धे च ।

**अचिरात्** अव्य० अचिरम् अततीति क्विप् । शीघ्रे, अचि-

**अचिराभा** स्त्री अचिरा आभा यस्याः । विद्युति ।

**अचिराय** अव्य० न चिराय । स्वल्पकाले शीघ्रे च ।

**अचिरेण** अव्य० चिरेणेत्यव्ययस्य न० त० । अल्पकाले शीघ्रे च ।

**अचिष्णु(ष्टु)** त्रि० अच-गतौ बा० इष्णु(ष्टु)च् । गमनशीले । "त्वष्टा दधच्छुष्ममिन्द्राय वृष्णेऽपाकोऽचिष्णु(ष्टु)रिति" यजु० अचि(ष्टु)ष्णुः सर्वगत इति वेददीपः ।

**अचेतन** त्रि० चेतना ज्ञानम् न०ब० । चेतनाशून्ये । चितत्वु न०त० । ज्ञानविशिष्टभिन्ने । ज्ञानञ्च द्विविधं विषयाकारमनोवृत्तिरूपं तत्फलितचैतन्यरूपञ्च तत्र वृत्तिरूपं ज्ञानं चित्तस्यैव धर्मः "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवेति" श्रुतौ तस्य चित्तधर्मत्वावगमात् । द्वितीयं तदुज्ज्वलितचैतन्यमात्मधर्मः । प्रकाशरूपचैतन्यस्य सर्वदा स्थितावपि वृत्तिसहकारेणैव तद्गताज्ञाननिवारणे चैतन्यं समुज्ज्वलति नान्यथा अतएव "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" इत्युक्तमिति वेदान्तिनः । सांख्यास्तु विषयोपरक्ता वृत्तिश्चितौ प्रतिबिम्बति तेनैव विषयावभासः "तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः । इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः" इति मन्यन्ते । नैयायिकास्तु सांख्यवेदान्तिमतसिद्धं यत् वृत्तिरूपं ज्ञानं तत्स्थानीयमात्मनश्चैतन्यमुररीचक्रुः । तादृशवृत्तौ तत्स्थानीयज्ञाने च आत्ममनःसंयोगादयः कारणानि । आभ्यन्तरसुखादिविषयग्रहणे मनःकरणम्, इन्द्रियाणि तु स्वस्वग्राह्यविषयग्रहणे करणानि, "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमिति" गौतमसूत्रे "प्रतिविषयाध्यवसाय इति" सांख्यसूत्रे च तथैव स्वस्वविषयेष्विन्द्रियाणां ग्राहकता उक्ता । तच्च तत्तच्छब्दावसरे दर्शयिष्यते । एवञ्च आभ्यन्तरे सुखादौ मन इव, बाह्येषु शब्दादिषु श्रोत्रादीनि असाधारणकारणानि । मनस्तु बाह्येषु सर्वत्र साधारणकारणमिति भेदः । एवञ्च ज्ञानकारणेन्द्रियशून्ये एवाचेतनशब्दस्य प्रवृत्तिः । अतएवोक्तं "सेन्द्रियं चेतनं द्रव्यं निरिन्द्रियमचेतनमिति" । एवञ्च वृक्षादीनामपि अन्तःकरणादिमत्त्वमस्त्येव । अन्यथा सुखदुःखानुभवो न स्यात् । तेषां हि स्वकर्मानुसारिदुःखभोगार्थमेव पापेनैव स्थावरत्वप्राप्तिः । अतएव "महापातकजान् घोरान् नरकान् प्राप्य दारुणान् । कर्मक्षयात् प्रजायन्ते महापातकिनस्त्विह" इत्युपक्रम्य "तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पगः" इति याज्ञवल्क्येन चेतनस्यैव पापावशेषभोगार्थं तृणादिरूपेण जन्मोक्तम् "शरीरजैः कर्म्मदोषैर्याति स्थावरतां नर" इति च सामान्यतः शारीरिकपापात् वृक्षादिरूपस्थावरजन्म तेनैवोक्तमतस्तेषां दुःखभोगार्थमेव वृक्षादिरूपत्वप्राप्तौ इन्द्रियाभावे कथङ्कारं ते दुःखमनुभवेयुरित्यवश्यं तेषु इन्द्रियादिमत्त्वमस्त्येव । अतएव पद्मं सरोऽन्तरं गच्छति, शाखा छिन्नापि चेतनसंयोगात् पुनः प्ररोहतीत्युपलभ्यते । अतएव च श्रुतौ "अथ जीवो यां जहाति सा शुष्यतीत्युक्तम् । तेन तेषां जीवसंबन्धोऽस्त्येव किन्तु विशिष्टचेतनाशून्यत्वादेव तेषु अचेतनत्वव्यवहार इति भेदः । पदार्थादर्शे "देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः । उद्भिज्ज अण्डजोऽस्वेदोत्थश्चतुर्थस्तु जरायुज" इति स्थावराणां देहसम्बन्ध उक्तः । "चेतनाधिष्ठिते भोगायतननिर्म्माणमन्यथा पूतिभावप्रसङ्ग" इति सांख्ये च चेतनसम्बन्धे एव भोगायतनरूपदेहोत्पत्तिरुक्ता । तेषाञ्च भोगायतनदेहवत्त्वेऽपि सर्वेन्द्रियस्थानगोलकादेरभावात् न दर्शनादि किन्तु त्वाचप्रत्यक्षं घ्राणजप्रत्यक्षं च भवत्येव अतएव अनलादिखरतरकिरणस्पर्शे तेषां शुष्कता, औषधिविशेषजधूमादिसम्पर्के च तद्घ्राणात् पुष्पफलोत्पत्तिः । अत एव तेषां द्वीन्द्रियत्वेन व्यवहारः यथोक्तम् "पञ्चेन्द्रिया मनुष्याद्याः सर्पाद्याश्चतुरिन्द्रियाः । त्रीन्द्रियाः कृमिकीटाद्या द्वीन्द्रिया वृक्षजातय" इति । मनसो विद्यमानत्वेऽपि हृदयरूपविशिष्टस्थानाभावात् न स्पष्टमवबोधः । सुश्रुते हि हृदयस्थानमुपवर्ण्य "तद्धृदयं विशिष्टचेतनाश्रयमित्युक्तम्" तेन तेषां विशिष्टचेतनाश्रय-